लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2024-25

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANADSE03T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. सरलसुरगिरा देवनागरीलिप्या च यथेच्छं ***प्रश्नद्वयस्य*** उत्तरं लेख्यम्। 10×2 = 20

(क) विश्वनाथाचार्येण प्रतिपादितं काव्यप्रयोजनं सविस्तरम् वर्ण्यताम्।

(ख) भेदोपभेदान् सह नायकलक्षणं सोदाहरणं प्रतिपादयत।

(ग) साहित्यदर्पणानुसारं रसस्वरूपं व्याख्यायताम्।

(घ) विश्वनाथमते लक्षणाभेदाः उदाहरणपुरःसरम् आलोच्यताम्।

2. अधोलिखितेषु यथेच्छं ***श्लोकचतुष्टयं*** सुरगिरा देवनागरलिप्या च व्याख्येयम्। 5×4 = 20

(क) चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥

(ख) नवानधोऽधो वृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना॥

(ग) निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना।
चकासतं चारुचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम्॥

(घ) स तप्तकार्त्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।
विदिद्युते बाडवजातवेदसः शिखाभिराक्लिष्ट इवाम्भसां निधिः॥

(ङ) हरत्यघं संप्रति हेतुरैष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥

(च) कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना।
सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसम्पदामिव॥

**अथवा**

अधोलिखितेषु यथेच्छं ***विषयचतुष्टयमवलम्ब्य*** संस्कृतेन देवनागरलिप्या च टीका लेख्या। 5×4 = 20
शिशुपालवधम्, नारदस्यवपुः, कार्तस्वरम्, कालत्रितयम्, कंसकृषः, शितिवासः।

3. अधोलिखितेषु यथेच्छं ***पञ्चानां*** प्रश्नानाम् उत्तरं संस्कृतेन देवनागरलिप्या च लेख्यम्। 2×5 = 10

(क) 'युगजीवनम्' इति नाटकस्य प्रणेतृनामोल्लिख्य मुख्यचरित्रस्य नामोपस्थाप्यताम्।

(ख) नाटकस्य विषयवस्तु किम्?

(ग) रासमणिदेव्याः परिचयः प्रदीयताम्।

(घ) नाटकमिदं कमुद्दिश्य रचितम्?

(ङ) नाटकस्यास्य अध्यायविभाजनं लेख्यम्।

(च) रमाचौधुरीदेव्याः प्रणीतं ग्रन्थद्वयम् उल्लेख्यम्।

(छ) अखिन् नाटके कीदृशी प्रस्तावना दृश्यते?

——×——